# श्री वाराही कवचम्

ध्यानम् -
ध्यात्वेन्द्र नीलवर्णाभां चन्द्र सूर्याग्नि लोचनां ।
विधि विष्णु हरेन्द्रादि मातृभैरव सेविताम् ॥ १॥

ज्वलन्मणिगण प्रोक्त मकुटा माविलम्बितां ।
अस्त्र शस्त्राणि सर्वाणि तत्तत्कार्योचितानि च ॥ २॥

एतैस्समस्तै र्विविधं बिभ्रतीं मुसलं हलं ।
पात्वा हिंस्रान् हि कवचं भुक्ति मुक्ति फलप्रदम् ॥ ३॥

पठेत्त्रिसन्ध्यं रक्षार्थं घोरशत्रु निवृत्तिदं ।
वार्ताली मे शिरः पातु घोराही फालमुत्तमम् ॥ ४॥

नेत्रे वराह वदना पातु कर्णौ तथाञ्जनी ।
घ्राणं मे रुन्धिनी पातु मुखं मे पातु जन्धिन् ॥ ५॥

पातु मे मोहिनी जिह्वां स्तम्भिनी कन्थ मादरात् ।
स्कन्धौ मे पञ्चमी पातु भुजौ महिष वाहना ॥ ६॥

सिंहारूढा करौ पातु कुचौ कृष्णमृगाञ्चिता ।
नाभिं च शङ्खिनी पातु पृष्ठदेशे तु चक्रिणि ॥ ७॥

खड्गं पातु च कट्यां मे मेढ्रं पातु च खेदिनी ।
गुदं मे क्रोधिनी पातु जघनं स्तम्भिनी तथा ॥ ८॥

चण्डोच्चण्डश्चोरुयुगं जानुनी शत्रुमर्दिनी ।
जङ्घाद्वयं भद्रकाली महाकाली च गुल्फयो ॥ ९॥

पादाद्यङ्गुलि पर्यन्तं पातु चोन्मत्तभैरवी ।
सर्वाङ्गं मे सदा पातु कालसङ्कर्षणी तथा ॥ १०॥

युक्तायुक्ता स्थितं नित्यं सर्वपापा त्प्रमुच्यते ।
सर्वे समर्थ्य संयुक्तं भक्त रक्षण तत्परम् ॥ ११॥

समस्त देवता सर्वं सव्यं विष्णोः पुरार्धने ।
सर्शशत्रु विनाशाय शूलिना निर्मितं पुरा ॥ १२॥

सर्वभक्त जनाश्रित्य सर्वविद्वेष संहतिः ।
वाराही कवचं नित्यं त्रिसन्ध्यं यः पठेन्नरः ॥ १३॥

तथाविधं भूतगणा न स्पृशन्ति कदाचन ।
आपदश्शत्रु चोरादि ग्रहदोषाश्च सम्भवाः ॥ १४॥

मातापुत्रं यथा वत्सं धेनुः पक्ष्मेव लोचनं ।
तथाङ्ग मेव वाराही रक्षा रक्षाति सर्वदा ॥ १५॥